# Shri Janaki SahasranAmastotram

# શ્રીજાનકીદેવ્યાઃ સહસ્રનામસ્તોત્રમ્

## Document Information

Text title : jAnakIsahasranAmastotram 2

File name : jAnakIsahasranAmastotram2.itx

Category : devii, sItA, sahsaranAma

Location : doc_devii

Proofread by : Prabhav Tengse

Description/comments : siddheshvarItantra

Latest update : April 24, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# શ્રીજાનકીદેવ્યાઃ સહસ્રનામસ્તોત્રમ્

સિદ્ધેશ્વરીતન્ત્રોક્તં

શ્રીલક્ષ્મણ ઉવાચ ।
દેવદેવ જગન્નાથ ! કથયસ્વ મહાપ્રભો ।
નામ્નાં સહસ્રં જાનક્યાઃ શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥

શ્રીરામ ઉવાચ ।
કથયામિ ભવત્પ્રીત્યા શ‍ૃણુ લક્ષ્મણ ! ભક્તિતઃ ।
યત્ પઠિત્વાથ શ્રુત્વા વા સર્વાન્ કામાનવાપ્નુયાત્ ॥

અસ્ય શ્રીજાનકીદેવ્યાઃ સહસ્રનામસ્તોત્રસ્ય વસિષ્ઠ ઋષિઃ,
વાગીશ્વરી દેવતા, અનુષ્ટુપ્છન્દઃ, સર્વકામાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ૐ જાનકી કમલા વિદ્યા સિદ્ધવિદ્યા ક્ષમાત્મજા ।
નિર્મલા ભાવની ભવ્યા સર્વમઙ્ગલરૂપિણી ॥ ૧॥

કૌલિની કુલજા કાન્તા અપર્ણા ભક્તવત્સલા ।
સુકેશી ચારુનેત્રા ચ દેવદાનવસેવિતા ॥ ૨॥

અતિગુપ્તા સરોજાક્ષી સકલા સર્વરૂપિણી ।
ભક્તિવશ્યા મહોગ્રા ચ સર્વતન્ત્રવિશારદા ॥ ૩॥

ધરાત્મજા મહામાયા શબ્દરૂપા મહોત્સવા ।
કામા ચ રમણીભદ્રા યજ્ઞોત્સવવિભૂષિતા ॥ ૪॥

ચન્દ્રવક્ત્રા ચકોરાક્ષી ચારુનેત્રા સુલોચના ।
રઘુનાથપ્રિયા દેવી શારદા કુલભૂષિતા ॥ ૫॥

કુલનાથા ચ દિવ્યા ચ શ્રીમતી વિશ્વરૂપિણી ।
રામપ્રિયા રામમતા રામગોપ્યા ચ મુક્તિદા ॥ ૬॥

ચતુર્વર્ગપ્રદા સૌખ્યા સર્વપાપવિનાશિની ।
વારાહી વારુણી વિદ્યા મહાવિદ્યા મહેશ્વરી ॥ ૭॥

સતી સત્યવતી ધૂમ્રા ધવલા ધર્મરૂપિણી ।
ધર્મનિષ્ઠા ધર્મમયી ધર્મી ધર્મનિષેવિતા ॥ ૮॥

બાલિકા યુવતી વૃધ્દ્ધા નિત્યા નિત્યમયી તથા ।
ગાયત્રી વેદમાતા ચ સર્વસઙ્કટતારિણી ॥ ૯॥

હિરણ્યા કનકા રક્તા ભદ્રા નીલસરસ્વતી ।
ઇન્દ્રા ચેન્દુસ્વરૂપા ચ દિવ્યામ્બરવિભૂષણા ॥ ૧૦॥

જગન્માતા જગદ્ધાત્રી જનની સર્વરૂપિણી ।
પત્ની ચામરકેશી ચ કુન્દદન્તા સુનાસિકા ॥ ૧૧॥

કુન્દોત્સવા કુન્દપ્રિયા કુન્દપુષ્પમયી તથા ।
આગ્નેયી વાયવી જ્યેષ્ઠા વારુણી વરુણપ્રિયા ॥ ૧૨॥

સર્વદિગ્વર્ણિતા વિશ્વા સર્વેષામુપકારિણી ।
બુદ્ધિર્મેધા પ્રિયા શક્તિસ્તુષ્ટિઃ પુષ્ટિર્ધૃતિ ક્ષમા ॥ ૧૩॥

અબલા નિશ્ચલા લક્ષ્મીઃ શ્રધ્દ્ધા પન્નગશાયિની ।
અનન્તા મહતી ચિન્તા હ્યચિન્ત્યા ચિન્મયી સ્મૃતા ॥ ૧૪॥

રજોમયી બ્રહ્મરૂપા વિષ્ણુમાયા મહેશ્વરી ।
સર્વતીર્થમયી દેવી દૈત્યદાનવનાશિની ॥ ૧૫॥

વિરૂપા વિશ્વરૂપા ચ મૃડાની મૃડવલ્લભા ।
કોટિચન્દ્રપ્રતીકાશા કોટિસૂર્ય્યસમપ્રભા ॥ ૧૬॥

નદમધ્યા નદભવા નદોદ્ભૂતા નદાક્ષિકા ।
મન્ત્રરૂપા મન્ત્રભવા યન્ત્રમન્ત્રમયી તથા ॥ ૧૭॥

દ્વિપદા ત્રિપદા ગોત્રા ચતુર્વણા ચ ત્ર્યક્ષરી ।
વરેષુ ગોપિતા ગુપ્તા અરણ્યસ્થિરનાયિકા ॥ ૧૮॥

સ્થિરા ચ તીર્થરૂપા ચ વેગિની વેગરૂપિણી ।
વેગાત્મિકા વેગધરા કાશ્યપી કમલેક્ષણા ॥ ૧૯॥

શક્તિરૂપા શક્તિધરા શક્તાશક્તવિભેદકા ।
ગુણાગુણમયી ગમ્યા નિર્ગુણા સદ્ગુણાન્વિતા ॥ ૨૦॥

ગન્ધર્વસેવિતા નન્દી પૂર્ણબ્રહ્મસ્વરૂપિણી ।

કાત્યાયની જગદ્ધાત્રી સ્થિતિસંહારકારિણી ॥ ૨૧॥

રામજાયા ચ માતઙ્ગી સુતુઙ્ગા કદલીપ્રિયા ।
પ્રીતિમનાઃ પ્રીતિદાત્રી ષડ્વૂર્ણશીર્ષભઞ્જિકા ॥ ૨૨॥

વેણુકાન્તા વેણુભવા વીણાવાદ્યા ચ શોભના ।
ખણ્ડચન્દ્રા પૂર્ણચન્દ્રા સકલા નિષ્કલા તથા ॥ ૨૩॥

તેજસ્કા મુખરા સૌમ્યા નિઃશબ્દા શબ્દરૂપિણી ।
સિન્દૂરારુણરક્તા ચ સિન્દૂરારુણભૂષિતા ॥ ૨૪॥

મેઘસ્વના ચ મેઘા ચ બાહુદણ્ડવિશોભિતા ।
જયધ્વનિ ર્નિર્ઘોરા ચ ખર્ખરા ખગરૂપિણી ॥ ૨૫॥

ખગાખ્યા ખગમાન્યા ચ તડિદ્રૂપા તડિત્પ્રભા ।
વજ્રરૂપા વજ્રમયી વજ્રતન્ત્રા ચ વિદ્રુમા ॥ ૨૬॥

કાદમ્બિની રતા રત્યા ચઞ્ચલા વિમલા ધ્રુવા ।
અસ્ત્રરૂપા શસ્ત્રરૂપા હ્યણિમા ધ્રુવમણ્ડલા ॥ ૨૭॥

તર્કવિદ્યા વેદવિદ્યા જ્યોતિર્વિદ્યા વિશારદા ।
કાલી કલ્પકલા સાધ્યા પાણ્ડુરૂપા પરાક્રમા ॥ ૨૮॥

નાગકન્યા નાગમાતા નાગપત્ની ફણાત્મિકા ।
શચી સત્યકલા નિદ્રા સુનિદ્રા ચ સુચેતના ॥ ૨૯॥

સુશીલા ખર્વરૂપા ચ ખર્વજઙ્ઘા કરાત્મિકા ।
દીર્ઘજઙ્ઘા દીર્ઘરવા દીર્ઘનાસા સુકર્ણિકા ॥ ૩૦॥

કર્ણેનપૂજિતાઽછિન્ના છિન્ના છિન્નમયી તથા ।
આપદા પાદપાપાદા જ્ઞાનાજ્ઞાનપરાયણા ॥ ૩૧॥

ગૌરી પદ્મા ચ કલ્યાણી ઉર્વશી ધ્વજરૂપિણી ।
પતાકી કેતકી ચૂર્ણા દૃઢવ્રતપરાયણા ॥ ૩૨॥

તિલોત્તમા રોહિણી ચ બદરી કવિમામિની ।
મઘા ચ ભરણી પૂર્વા પરાઽપૂર્વા ચ પૂર્વિકા ॥ ૩૩॥

અપર્વિકા અપૂર્વા ચ અપૂર્વફલભૂષિતા ।
શઙ્ખિની શઙ્ખહસ્તા ચ ચિત્રહસ્તા સુકોમલા ॥ ૩૪॥

કોમલા પત્રરૂપા ચ ગાન્ધારી ચપલા કલા ।
રુક્મિણી રુક્મરૂપા ચ ક્ષુધા તૃષ્ણા જરાતુરા ॥ ૩૫॥

અચિન્ત્યા ચિન્તિતા ચિન્તા મનોજ્ઞા મનસિસ્થિતા ।
અઞ્જના ત્વાજના વ્યઞ્જા વ્યઞ્જનીયા જરાર્પિતા ॥ ૩૬॥

અજરા નિર્જરા જીર્ણા જીર્ણાર્પિતવિભાવિની ।
કૂર્મરૂપા સૂકરી ચ હરિણી મૃગરૂપિણી ॥ ૩૭॥

કસ્તૂરી મૃગનાભિઃ ચ કર્પૂરાગરુકુઙ્કુમા ।
રઘુદેવરતા શક્તા રઘુદેવરતિપ્રિયા ॥ ૩૮॥

પૌરન્દરી તથા વિષ્ણોર્જાયા માહેશ્વરી વરા ।
સર્વેષાઞ્જનની નિત્યા ચાર્વઙ્ગી જનકાત્મજા ॥ ૩૯॥

મહાધીરા મહામાયા મહામોહા મહોત્સવા ।
વૈકુણ્ઠનાથપત્ની ચ વિમલારુણરૂપિણી ॥ ૪૦॥

ભાગીરથી મનોબુદ્ધિર્નિત્યાનન્દમયી સહા ।
મહાવ્યાધિહરા ભીમા સર્વરોગાપહારિણી ॥ ૪૧॥

શઙ્ખિની ચક્રિણી ધાત્રી હસ્તેપુસ્તકધારિણી ।
સમ્પદા ચ સદાચારા દ્રૌપદી દ્રુપદાત્મિકા ॥ ૪૨॥

સતાંસૃષ્ટિકરી સૌમ્યા દૈત્યાનાં ક્ષયકારિણી ।
દરૈત્યપ્રાણહરા ધાત્રી દયામોદરસપ્રિયા ॥ ૪૩॥

ક્ષાન્તિઃ ક્ષેમઙ્કરી બુદ્ધિર્ભારતી ભયનાશિની ।
તરણિસ્તરુણી તીક્ષ્ણા તીક્ષ્ણદૈત્યવિનાશિની ॥ ૪૪॥

દાત્રી દાનપરા દાન્તા દુષ્ટદૈત્યવિનાશિની ।
ક્રિયા ક્રિયાવતી હૃષ્ટા તુષ્ટા પુષ્ટા તથોર્વશી ।
વેદમના વેદકન્યા વેદમાન્યા પુલોમજા ॥ ૪૫॥

સુખિની સુખદાત્રી ચ સર્વસૌખ્યવિવર્ધિની ।
શીલા શીલવતી સૂક્ષ્મા સૂક્ષ્માસૂક્ષ્મવરપ્રદા ॥ ૪૬॥

વરેણ્યા વરદા વાણી જ્ઞાનિની જ્ઞાનદાત્મજા ।
ભૃગુવંશસમુદ્ભૂતા ભાર્ગવી ભૃગુવલ્લભા ॥ ૪૭॥

રક્તામ્બરધરા રામા રમણી સુરનાયિકા ।

મોક્ષદા શિવદા શ્યામા યોગધ્યાનપરાયણા ॥ ૪૮॥

યોગેશ્વરી યોગરૂપા યોગનિદ્રા કૃશોદરી ।
અમ્બા જામ્બવતી ચૈવ સત્યભામા મનોરથા ॥ ૪૯॥

રૌદ્રા રૌદ્રસ્વના રૌદ્રી રૌદ્રદૈત્યવિનાશિની ।
કુમારી કૌશિકી કાલી કામદૈત્યવિનાશિની ॥ ૫૦॥

રામપત્ની રામરતા રામજાયા મહોદરી ।
વિષ્ણુપત્ની વિષ્ણુભવા વિષ્ણુજાયા ચ શૂલિની ॥ ૫૧॥

મદનાન્તક કાન્તા ચ મદનાન્તકવલ્લભા ।
ભૂતભવ્યભવસ્પૃષ્ટા પાવની પરિપાલિની ॥ ૫૨॥

અદૃશ્યા વ્યક્તરૂપા ચ દૃશ્યા શ્રેષ્ઠા પ્રવર્દ્ધિની ।
અપાન્નિધિસમુદ્ભૂતા ધારિણી ચ પ્રતિષ્ઠિતા ॥ ૫૩॥

અચ્યુતા ચાચ્યુતપ્રાણા પ્રાણદા વાસવેશ્વરી ।
ઉત્તરા ક્ષોભણા ક્ષેમા શ્રીગર્ભા પરમેશ્વરી ॥ ૫૪॥

વરદા પુષ્ટિદેહા ચ કામિની કઞ્જલોચના ।
શરણ્યા વરદા પ્રીતા પ્રીત્યાનાનન્દસ્વરૂપિણી ॥ ૫૫॥

પતાકિની દયારમ્ભા સુરમ્યા ચ સુરેશ્વરી ।
શ્રીમતી ચ શિવા નન્દા ત્રિશક્તિર્મોક્ષદાયિની ॥ ૫૬॥

પરાપરકલા કાન્તા શિશિરાચલકન્યકા ।
દક્ષા ભગવતી ધેનુઃ કામધેનુઃ કલાવતી ॥ ૫૭॥

સુરમાન્યા સુરશ્રેષ્ઠા શ્રેષ્ઠા પ્રાણેશ્વરી સ્થિરા ।
વજ્રાયુધા વ્રજહસ્તા ચણ્ડી ચણ્ડપરાક્રમા ॥ ૫૮॥

તમોઘ્ની ધ્વાન્તસંહન્ત્રી પ્રયતાત્મા પતિવ્રતા ।
ગૌરી સુવર્ણવર્ણા ચ સ્થિતિસંહારકારિણી ॥ ૫૯॥

મેધાવિની મહાવીર્યા હંસી સંસારતારિણી ।
એકાનેકા મહેજ્યા ચ સર્વલોકપ્રકાશિની ॥ ૬૦॥

ષટ્ચક્રભેદિની વામા કાર્યસ્થા કાર્યરઞ્જિતા ।
પ્રણતા પ્રાણિનામાર્તિહારિણી દૈત્યનાશિની ॥ ૬૧॥

અજા ચ બહુવર્ણા ચ પુરુષાર્થપ્રવર્તિની ।
ગણિતા ગુણસમ્પન્ના નગજા ખગવાહિની ॥ ૬૨॥

રક્તા નીલા સિતા શ્યામા કૃષ્ણા બભ્રુશ્ચ કર્બુરા ।
ક્ષુધા તૃષ્ણા જરા વૃદ્ધા તરુણી કરુણાલયા ॥ ૬૩॥

ચન્દ્રાનના મહોક્ષી ચ ચારુમૂર્દ્ધજશોભિતા ।
કલા કાષ્ઠા મુહૂર્તા ચ નિમેષા કાલરૂપિણી ॥ ૬૪॥

માનિની માધવી માન્યા માનનીયા મહાગુણા ।
સુવર્ણવસના નાશા ચક્ષુસ્પર્શવતી રસા ॥ ૬૫॥

ગન્ધપ્રિયા સુગન્ધા ચ મનોજ્ઞા ચ મનોગતા ।
હસ્તા જ્યેષ્ઠા મઘા પુષ્યા ધનિષ્ઠા પૂર્વફલ્ગુની ॥ ૬૬॥

મૃગનાભિર્મૃગાક્ષી ચ કર્પૂરામોદધારિણી ।
મધુશ્રીર્માધવી વલ્લી મધુમત્તા મદોદ્ધતા ॥ ૬૭॥

રેવતી રમણી ચિત્રા ચિત્રહારવિભૂષણા ।
રક્તામ્બરધરા ક્ષીણા રક્તપુષ્પાવતંસિની ॥ ૬૮॥

નવપુષ્પાત્મિકા પુષ્પા પુષ્પસ્રક્સુવિભૂષણા ।
શુક્લામ્બરધરા ધીરા મહાશ્વેતા વસુપ્રિયા ॥ ૬૯॥

નવપુષ્પગૃહોપેતા નવપુષ્પોપશોભિતા ।
ચન્દ્રિકા ચન્દ્રકાન્તિશ્ચ સૂર્યકાન્તિર્નિશાચરી ॥ ૭૦॥

વિજયા ચ જયન્તી ચ મોહિની શત્રુનાશિની ।
લજ્જા સરસ્વતી નન્દા દાનવેન્દ્રપ્રમર્દિની ॥ ૭૧॥

ચદ્રમણ્ડલસઙ્કાશા જ્ઞાનાનન્દપ્રવર્દ્ધિની ।
રૂપયૌવનસમ્પન્ના ગુણશીલસમન્વિતા ॥ ૭૨॥

સર્વૈશ્વર્યસમાયુક્તા સર્વલાવણ્યશોભિતા ।
શીતા શીતપ્રિયા સ્વર્ગા સકલા વનદેવતા ।
ગુરુરૂપધરા ગુર્વી કાલમૃત્યુવિનાશિની ॥ ૭૩॥

અણિમાદિગુણોપેતા મહામારી ચ શાન્તિદા ।
ચતુઃસમુદ્રશયના ચતુર્વર્ગફલપ્રદા ॥ ૭૪॥

સર્વકાલોદ્ભવા પ્રીતા સર્વકાલોદ્ભવોદ્ભવા ।

અનાદિનિધના પુષ્ટિર્વૃક્ષમધ્યનિવાસિની ॥ ૭૫॥

સર્વચક્રેશ્વરી સર્વા સર્વમન્ત્રમયી સદા ।
સહસ્રનયના પ્રાણા સહસ્રનયનપ્રિયા ॥ ૭૬॥

સહસ્રશીર્ષા સુમના મન્દભા સર્વભઞ્જિકા ।
ગીતનૃત્યપ્રિયા કામા સન્તુષ્ટિર્ધનદા પ્રદા ॥ ૭૭॥

માયાધરી મણિરતા મણિસમ્માનતત્પરા ।
માધવા નન્દદા મધ્વી યશોદાનન્દવર્દ્ધની ॥ ૭૮॥

યજ્ઞપ્રીતા યજ્ઞમયી યજ્ઞકર્મવિભૂષણા ।
રાજા રાજકુલેજ્યા ચ રાજરાજેશ્વરી રમા ॥ ૭૯॥

રમિણી રામિણી રાકા રમાનન્દપ્રદાયિની ।
રજનીકરપૂર્ણાસ્યા રક્તોત્પલવિલોચના ॥ ૮૦॥

લાઙ્ગલી પ્રેમસન્તુષ્ટા લાઙ્ગલીપ્રણયપ્રિયા ।
લાક્ષારુણા ચ લલના લીલા લીલાવતી લયા ॥ ૮૧॥

લઙ્કેશ્વરગુણપ્રીતા લઙ્કેશવરદાયિની ॥ ૮૨॥

લવઙ્ગકુસુમપ્રીતા લવઙ્ગકુસુમપ્રભા ।
પુણ્યદા પૂર્ણિમા પુણ્યા પુણ્યકોટિફલપ્રદા ॥ ૮૩॥

પુરાણગોચરા પૂર્ણાઽપૂર્વા પ્રૌઢવિનાશિની ।
પ્રહ્લાદહૃદયાહ્લાદગેહિની પુણ્યચારિણી ॥ ૮૪॥

ફલદાત્રી ફલાસક્તા ફલદાતૃવિભૂષિતા ।
વાણી વિલાસકરિણી વરાઙ્ગી ચ વરાનના ॥ ૮૫॥

વિષ્ણોર્વક્ષસ્થલસ્થા ચ વાગ્મતી વિન્ધ્યગેહિની ।
ધીરા ધૈર્યવતી ધૃષ્ટા ધવલામ્ભોજસન્નિભા ॥ ૮૬॥

તન્ત્રધારી તન્ત્રતારી તન્ત્રકારી ભવાતુરા ।
તપસ્યા તાલિની તીર્ણા દૂર્વાદલસુસેવિતા ॥ ૮૭॥

કર્પૂરપૂરવદના કલાનાથસમપ્રભા ।
કલાકેલિપ્રિયાકીર્ણા કુઞ્જરેશ્વરગામિની ॥ ૮૮॥

ખર્વા ચ ખઞ્જનદ્વન્દ્વલોચના રવભૂષિતા ।

ખદ્યોત ઇવ દુર્લક્ષ્યા ખદ્યોત ઇવ ચઞ્ચલા ॥ ૮૯॥

ચલચ્ચકોરનયના ચલત્ખઞ્જનલોચના ।
ચતુર્વેદમયી રૂપા ચતુર્વર્ણમયી ભૃતા ॥ ૯૦॥

જગન્નાથપ્રિયા જીવા જગન્નાથરતા જયા ।
જામાતૃવરદા જમ્ભા યમલાર્જુનધારિણી ॥ ૯૧॥

તપસ્યા તાલિની તીર્ણા પૂર્ણાનન્દમયી સદા ।
તારસ્વરેણસહિતા તારસ્વરવિભૂષિતા ॥ ૯૨॥

વંશધ્વજા વંશરૂપા નન્દિની કુલમધ્યગા ।
ફટ્કારપ્રણયા વૃદ્ધા ચિત્રા પાતકનાશિની ॥ ૯૩॥

અધઃ સ્થિતા ચ પાતાલા અધોભુવનગામિની ।
અતલા વિતલા તીર્ણા સુતલા નાગશાયિની ॥ ૯૪॥

દ્વિજિહ્વા બહુજિહ્વા ચ રસના સુરસેવિતા ।
શૂન્યા રણ્યા વરેણ્યા ચ વરિષ્ઠા ચ યુગામ્બરા ॥ ૯૫॥

પ્રતિપર્વસ્થિતા દેવી તિથિઃ સ્વરવિભૂષિતા ।
પ્રતિમા નવમી ચૈવ યુગાદ્યા ચક્રરૂપિણી ॥ ૯૬॥

વાહગ્રસ્તા વાહભરા વાહસૂર્યસમન્વિતા ।
ચન્દ્રજ્યોત્સ્નામરા કામ્યા રાકામૃતચરા ચરી ॥ ૯૭॥

નાગરી નાગરા જ્યેષ્ઠા નાગરાજસુતા નગા ।
નવીનેન્દુકલા નન્દી નન્દિકેશ્વરપૂજિતા ॥ ૯૮॥

નીરજાક્ષી ચઞ્ચલાક્ષી નીરજદ્વન્દ્વલોચના ।
નીરપ્રસૂર્નીરભવા નીરનિર્મલદેહિની ॥ ૯૯॥

નવીનકેતકીકુન્દ -માકન્દસ્રગ્વિભૂષિતા ।
નાયિકાનન્દનિલયા નાયકાનન્દકારિણી ॥ ૧૦૦॥

નર્મકર્મરતા નિત્યા નર્મધર્મપરાયણા ।
નર્મપ્રીતા નર્મરતા નર્મધ્યાનપરાયણા ॥ ૧૦૧॥

નર્મકર્મૈકસહિતા નર્મકર્મૈકપાલિકા ।
નવનારીગુણપ્રીતા નવનારીવરપ્રદા ॥ ૧૦૨॥

નારાયણપ્રિયા કાન્તા નિષ્કલા પરમા કલા ।
નારાયણપ્રિયા દેવી નારાયણસમન્વિતા ॥ ૧૦૩॥

નારાયણી સમા યુક્તા સત્યભામા દૃઢવ્રતા ।
ચતુઃસાગરમધ્યસ્થા ચતુઃસાગરરૂપિણી ॥ ૧૦૪॥

વાસુદેવરતા વિશ્વા વિજ્ઞા વિજ્ઞાનકારિણી ।
વીણાવતી વલાકીર્ણા બાલપા પુષ્પરોહિતા ॥ ૧૦૫॥

બલવી સુમતિર્વૈદ્યા વિદ્યાહારવિભૂષિતા ।
વિદ્યાવતી વૈદ્યપદા સીતા વૈવસ્વતા વલિઃ ॥ ૧૦૬॥

ભીતિહા ભયદા ભીતિરંશુજાલસમપ્રભા ।
શર્વાણી સુમના સર્વા સુભદ્રા ભદ્રિકા તથા ॥ ૧૦૭॥

વિનતા શઙ્કરી શાન્તા માનવી માનરૂપિણી ।
મનુધ્યાના મનુજ્ઞાના માનસી મનુચિત્તગા ॥ ૧૦૮॥

સદાગોપ્યા જપરતા જપસ્તુત્યાદિભૂષિતા ।
મરીચી મારિચી ચૈવ હૈમા હૈમવતી શિલા ॥ ૧૦૯॥

સુગન્ધા ગન્ધસહિતા આયુષ્યક્ષયરૂપિણી ।
ક્ષીરસાક્ષી ક્ષીરસ્રવા ક્ષીરિકા શ્રીર્હરિપ્રિયા ॥ ૧૧૦॥

બીજમયી બીજરૂપા બીજોદ્ભવા ચ બીજિકા ।
દ્વારા દ્વારવતી ધ્વાન્તા પ્રચણ્ડા દ્વારમાલિની ॥ ૧૧૧॥

કલ્યાણી કમલા કારા કમલી કાલરૂપિણી ।
કામાક્ષી કામદા કામ્યા કામના કામચારિણી ॥ ૧૧૨॥

કાલરાત્રિર્મહાકાલી કૌલિની કલ્પરૂપિણી ।
કુમારી કરુણા કીર્ત્તિઃ કલિકલ્મષનાશિની ॥ ૧૧૩॥

કાત્યાયની કલાધારી કૌમુદી કમલપ્રિયા ।
માહેશ્વરી મહામાયા મહાતેજા મહેશ્વરી ॥ ૧૧૪॥

મહાજ્યોતિર્મહામૂર્તિર્મહાસુરવિનાશિની ॥ ૧૧૫॥

મહામાયા મહાવીર્યા મહાપાતકનાશિની ।
મહામખા મન્ત્રમયી મણિપૂરકવાસિની ॥ ૧૧૬॥

માનસી માનદા માન્યા મનશ્ચક્ષુરગોચરા ।
ગણ્યા મતા ચ ગાયત્રી ગન્ધર્વગણસેવિતા ॥ ૧૧૭॥

સિધ્દા યજ્ઞપ્રિયા શક્તિર્યજ્ઞાઙ્ગી યજ્ઞવર્ત્મિકા ।
યજ્ઞરૂપા યજ્ઞભવા યજ્ઞી યજ્ઞકૃતાલયા ॥ ૧૧૮॥

જાલન્ધરી જગન્માતા જાતવેદા જગત્પિતા ।
જિતેન્દ્રિયા જિતક્રોધા જનની જયદાયિની ॥ ૧૧૯॥

ગઙ્ગા ગોદાવરી રેવા ગૌતમી ચ શતદ્રુકા ।
સિન્ધુર્મન્દાકિની સિધ્દા યમુના ચ સરસ્વતી ॥ ૧૨૦॥

ચન્દ્રભાગા વિપાશા ચ ગણ્ડકી વિન્ધ્યવાસિની ।
નર્મદા કદ્રુ કાવેરી અહલ્યા ચમ્પકાવતી ॥ ૧૨૧॥

અયોધ્યા મથુરા માયા કાશી કાઞ્ચી હ્યવન્તિકા ।
દ્વારાવતી ચ તીર્થેશા મહાકિલ્બિષનાશિની ॥ ૧૨૨॥

વૈષ્ણવી વિષ્ણુરૂપા ચ વિષ્ણુમાયા સ્વરૂપિણી ।
શિવેશ્વરી શિવા રાધા ભવાની ભવમોચની ॥ ૧૨૩॥

હલ્લોત્ખાતસમુદ્ભૂતા રત્નભૂતા ધનેશ્વરી ।
હૃદ્યા વિદ્યાપ્રદાત્રી ચ કુશમાતા પરેશ્વરી ॥ ૧૨૪॥

લવમાતા સૌમ્યમૂર્ત્તિઃ શર્વા સર્વાનુશાસની ।
કમલા વિષ્ણુવન્દ્યા ચ માન્યા સુનયનાત્મજા ॥ ૧૨૫॥

રામેશી રામરમણી રામરામા રમેશ્વરી ।
વૈદેહી મૈથિલી સિધ્દા મિથિલાભૂમિજા તથા ॥ ૧૨૬॥

સુફલા ચર્ચિતા વન્દ્યા દશાનનવિનાશિની ।
દણ્ડા દણ્ડપ્રિયા ચૈવ દણ્ડકારણ્યવાસિની ॥ ૧૨૭॥

લક્ષ્મણારાધિતા શાન્તા કાન્તા ભરતવન્દિતા ।
શત્રુઘ્નપૂજિતા કાન્તિઃ હનુમદ્વન્દિતા વરા ॥ ૧૨૮॥

મહોગ્રા ચ મહાસેના માહેશી મૈથિલાત્મજા ।
સાકેતેશા જનારાધ્યા ધનેશી ધનદા શુભા ॥ ૧૨૯॥

॥ ફલશ્રુતિઃ ॥

પુણ્યં સહસ્રનામેદં જાનક્યા ભુવિ દુર્લભમ્ ।
યઃ પઠેત્ પ્રાતરુત્થાય શુચિર્ભૂત્વા સમાહિતઃ ॥ ૧૩૦॥

યશ્ચાપિ શ‍ૃણુયાન્નિત્યં નરો નિશ્ચલમાનસઃ ।
એકકાલં દ્વિકાલં ચ ત્રિકાલં શ્રદ્ધયાન્વિતઃ ॥ ૧૩૧॥

સર્વપાપવિનિર્મુક્તો ધનધાન્યસુતાન્વિતઃ ।
તેજસ્વી બલવાન્ શૂરઃ શોકરોગવિવર્જિતઃ ॥ ૧૩૨॥

યશસ્વી કીર્તિમાન્ ધન્યઃ સુભગો લોકપૂજિતઃ ।
રૂપવાન્ ગુણસમ્પન્નઃ પ્રભાવીર્યસમન્વિતઃ ॥ ૧૩૩॥

શ્રેયાંસિ લભતે નિત્યં નિશ્ચલાં ચ શુભાં શ્રિયમ્ ।
સર્વદુઃખવિનિર્મુક્તો લોભક્રોધવિવર્જિતઃ ॥ ૧૩૪॥

વિદ્યાનાં પારગો વિપ્રઃ, ક્ષત્રિયો વિજયી ભવેત્ ।
વૈશ્યસ્તુ ધનલાભાઢ્યઃ શૂદ્રસ્તત્સુખમશ્નુતે ॥ ૧૩૫॥

પુત્રાર્થી લભતે પુત્રં ધનાર્થી લભતે ધનમ્ ।
ઇષ્ટકામાંસ્તુ કામાર્થી ધર્માર્થી ધર્મમક્ષયમ્ ॥ ૧૩૬॥

॥ ઇતિ શ્રીસિદ્ધેશ્વરીતન્ત્રે જાનકીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Prabhav Tengse

*Shri Janaki SahasranAmastotram*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*